# Shri Vighnesha Stuti Ditikrita

# દિતિકૃતા શ્રીવિઘ્નેશસ્તુતિઃ

## Document Information

Text title : Shri Vighnesha Stuti Ditikrita

File name : vighneshastutiHditikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM saptamaH khaNDaH | adhyAyaH 14 | 7.14 12-30||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# દિતિકૃતા શ્રીવિઘ્નેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

દિતિરુવાચ ।

નમસ્તે વિઘ્નરાજાય ભક્તવિઘ્નવિદારણ ।

અભક્તેભ્યો મહાવિઘ્નપ્રદાય તુ નમો નમઃ ॥ ૧૨॥

કાશ્યપાય પરેશાય વિનાયકાય ઢુણ્ઢયે ।

લમ્બોદરાય તે સર્વભોગભોક્ત્રે નમો નમઃ ॥ ૧૩॥

દીનાનાં પતયે તુભ્યં દીનદીનાય તે નમઃ ।

દીનપાલકનાથાય હેરમ્બાય નમો નમઃ ॥ ૧૪॥

પરેશાય ગણેશાય પરાત્પરતમાય તે ।

પરાત્પરાણાં કર્ત્રે તે મહોદરાય વૈ નમઃ ॥ ૧૫॥

અનાદયે ચ સર્વેષામાદિમૂર્તિધરાય ચ ।

આદિપૂજ્યાય સર્વેષામન્તઃસ્થાય નમો નમઃ ॥ ૧૬॥

શિવપુત્રાય વિષ્ણોશ્ચ પુત્રાય પરમાત્મને ।

વરેણ્યસૂનવે તુભ્યં શેષપુત્રાય તે નમઃ ॥ ૧૭॥

સર્વપૂજ્યાય જ્યેષ્ઠાય જ્યેષ્ઠાનાં જ્યેષ્ઠમૂર્તયે ।

જ્યેષ્ઠરાજતમાયૈવ માત્રે પિત્રે નમો નમઃ ॥ ૧૮॥

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મભ્યો બ્રહ્મદાયિને ।

બ્રહ્મણાં બ્રહ્મરૂપાયૈકદન્તાય નમો નમઃ ॥ ૧૯॥

ગજાનનાય દેવાયાસુરાય સમભાવિને ।

યોગાકારાય યોગિભ્યો યોગદાય નમો નમઃ ॥ ૨૦॥

કિં સ્તૌમિ ત્વાં ગણાધીશ શાન્તીનાં શાન્તિરૂપિણમ્ ।

વેદાદયઃ શિવાદ્યાશ્ચ યત્ર શાન્તિં પ્રલેભિરે ॥ ૨૧॥

અતસ્ત્વાં પ્રણમામ્યેવ સર્વેઽશં તેન વિઘ્નપ ।

સન્તુષ્ટો ભવ મે ભક્ત્યા સ્વલ્પયા નાથ તે નમઃ ॥ ૨૨॥

યદિ ત્વં વરદો મેઽસિ તદા મે પુત્ર આદરાત્ ।

ભવ સ્વામિન્ દયાસિન્ધો તેનાઽહં તારિતા ત્વયા ॥ ૨૩॥
આસુરી પ્રકૃતિઃ પ્રોક્તા વેદેષુ દ્વિરદાનન ।
સાઽહં કયા મહાભક્ત્યા ભજિષ્યામિ નિરન્તરમ્ ॥ ૨૪॥
ત્વં મે પુત્રો યદા નાથ ભવિષ્યસિ સુસિદ્ધિદઃ ।
તવ માતુઃ કથં માયામયો બન્ધઃ કદાચન ॥ ૨૫॥
ભક્તિં ત્વચ્ચરણે દ્વન્દ્વે દેહિ નિત્યં વિશેષતઃ ।
આસુરીં બન્ધહીનાં માં કુરુષ્વ ત્વત્પદપ્રિયામ્ ॥ ૨૬॥
એવમુક્ત્વા ગણાધીશં નનામ દક્ષનન્દિની ।
દિતિસ્તાં ગણરાજશ્ચ જગાદ હર્ષસંયુતઃ ॥ ૨૭॥
(ફલશ્રુતિઃ)
વિઘ્નેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મદીયં મત્પ્રિયં ભવેત્ ।
પઠતે શ‍ૃણ્વતે દેવિ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૮॥
તવ પુત્રો ભવિષ્યામિ આસુરીભાવનાશકઃ ।
ત્વં ભજિષ્યસિ માં નિત્યં ભક્ત્યા ભાવપરાયણા ॥ ૨૯॥
એવમુક્ત્વાંઽતર્દધેઽસૌ વિઘ્નેશો બ્રહ્મનાયકઃ ।
દિતિઃ સ્વગૃહમાગત્ય પ્રણનામ પતિં સ્વકમ્ ॥ ૩૦॥

ઇતિ દિતિકૃતા શ્રીવિઘ્નેશસ્તુતિઃ સમ્પૂર્ણા ॥
ષોડશસ્તોત્રં
- ॥ મુદ્ગલપુરાણં સપ્તમઃ ખણ્ડઃ । અધ્યાયઃ ૧૪ । ૭.૧૪ ૧૨-૩૦॥

- .. mudgalapurANaM saptamaH khaNDaH . adhyAyaH 14 . 7.14 12-30..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Vighnesha Stuti Ditikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*